National Journal of Hindi & Sanskrit Research

ISSN: 2454-9177
NJHSR 2026; 1(65): 229-232
© 2026 NJHSR
www.sanskritarticle.com

**मधुमिता दासः**
विद्यावारिधिःशोधच्छात्रा,
साहित्यविभागः,
राष्ट्रियसंस्कृतविश्वविद्यालयः,
तिरूपतिः

**Correspondence:**
**मधुमिता दासः**
विद्यावारिधिःशोधच्छात्रा,
साहित्यविभागः,
राष्ट्रियसंस्कृतविश्वविद्यालयः,
तिरूपतिः

# आधुनिकसंस्कृतसाहित्यस्य विकासपरम्परायां रामाशीषपाण्डेयस्य अवदानं निरीक्षणम्

**मधुमिता दासः**

**संक्षिप्तसारः**

संस्कृतसाहित्याकाशे विद्योतन्ते सहस्रसः काव्यनक्षत्राणि कविरत्नानि च सन्ति अपरिमिताः संस्कृतकाव्यरन्ताकरे । परन्तु तेषु असंख्येषु कविरत्नेषु रामाशीषपाण्डेयः एव कौस्तुभमणिवद् विभाति । आधुनिकसंस्कृतसाहित्यस्य विकासे रामाशीषपाण्डेयस्य अवदानम् अविस्मरणीयमस्ति। येषां कतिपयानां संस्कृतसाहित्तिकानां रचनाभिः आधुनिकसंस्कृतसाहित्यं सम्यक् विकासं प्राप्तवत्, तेषु रामाशीषपाण्डेयः अन्यतमः। रामाशीषपाण्डेयः स्वकीयया अभिनवया रचनाशैल्या आधुनिके संस्कृतसाहित्ये नवचैतन्यं संस्थापितवान्।

श्रीमति-इन्दिरागान्ध्याः जन्मानन्तरात् मृत्युपर्यन्तं यावत् चरितम् 'इन्दिराशतकम्' इति खण्डकाव्ये अत्यन्तं सहजसरलया शैल्या वर्णितम्। 'काव्यकादम्बकम्' इति मुक्तककाव्ये कवेः अनेकाः भावनाः अभिव्यक्ताः सन्ति। याः अनुकरणीयाः सन्ति । 'काव्यकादम्बकम्' षष्टिकवितायाः संग्रहः अस्ति। कस्यापि काव्यरचनायाः पूर्वं मङ्गलाचरणेन देवतानां स्मरणं क्रियते, यतः ते एव सुफलप्रदाने समर्थाः सन्ति। अस्य काव्यस्य आरम्भे विद्यादायिन्याः देव्याः सरस्वतीम् आह्वानं कृतमस्ति। या स्ववीणावादनद्वारा समस्ते लोके विद्यायाः प्रसारं करोति। 'कृष्णोदयम्' एकं पञ्चदशसर्गयुक्ताः महाकाव्यमस्ति। अस्मिन् भगवतः श्रीकृष्णस्य कथा वर्णिता। एतत् कृष्णकथाश्रितं महाकाव्यमिति कथयितुं शक्यते। 'कर्णार्जुनीयम्' इति षडङ्कात्मकं नाटकम्। 'महाभारतम्' भारतस्य उज्ज्वल-ज्ञानपरम्परायाः कृष्णद्वैपायनवेदव्यासेन रचितम् एकमेव निधिरस्ति । 'महाभारतम्' धर्मशास्त्रमस्ति, यस्मिन् अधर्मस्य उपरि धर्मस्य विजयस्य व्याख्या कृता। एतत् अस्माकं वीराणां पुण्यगाथा धार्मिकग्रन्थं च अस्ति। अस्मिन् राज्ञः तथा प्रजायाः पृथक-पृथक् कर्तव्यः अधिकाराणां सुन्दरं वर्णनं व्यवस्थितेन प्रकारेण कृतम्। प्रस्तुतगवेषणापत्रे आधुनिकसंस्कृतसाहित्यस्य विकासे रामाशीषपाण्डेयस्य अवदानं संक्षेपेण विवृतम् ।

**कुञ्चिकाशब्दः –** काव्यनक्षत्रः, कौस्तुभमणिः, महाभारतम्, नवचैतन्यम्, रचनाशैली, काव्यकादम्बकम्, कर्णार्जुनीयम्, इन्दिराशतकम् ।

**उपोद्घातः -**

रामाशीषपाण्डेयः संस्कृतसाहित्यस्य अग्रगण्यः पण्डितः, कविः, नाट्यकारः अनुसन्धाताश्च । तस्य रचनाचिन्तनं संस्कृतसाहित्यपरम्परायाः आधुनिकतायाः च सङ्गमं कृत्वा नवां दिशं प्रदत्तवन्तौ । डा. रामाशीषपाण्डेयः १९४४ तमे वर्षे जयतीपुरग्रामे बिहारप्रदेशे अजायत। तस्य पिता श्रीसिद्धेश्वरपाण्डेयः यज्ञनिरतः, प्रवचनकर्त्ता, वेदमार्गनुरागी च आसीत्, तस्य माता च जानकी देवी । कविः व्याकारणाचार्य, वेदाचार्य तथा आयुर्वेदशास्त्रम् इत्यादयः उपाधयः प्राप्ताः।

पाण्डेयमहोदयः आचार्यः (साहित्यम्) तथा एम.ए (संस्कृतम्) उत्तीर्ण भूत्वा १९७० तमे वर्षे हथुआराज ज्ञानोदयसंस्कृतमहाविद्यालये मन्दिरीपटनायां साहित्यप्राध्यापकपदे नियुक्तः अभवत्।

१९७३ वर्ष पर्यन्तं तत्र कार्यं कृत्वा २२-०१-१९७३ तमे दिनाङ्के मारवाडीमहाविद्यालये राँचीनगरे संस्कृतव्याख्यातापदे नियुक्तिं स्वीकृतवान्। संस्कृतविभागाध्यक्ष्यरूपेण कार्यं निर्वहन् १९८५ तमे वर्षे सः उपाचार्य (रीडर) पदे पदोन्नतिं प्राप्तवान्। एषा पदोन्नतिः विश्वविद्यालय-सेवा-आयोगेन अनुमोदिता तथा राँचीविश्वविद्यालयेन अनुमोदिता आसीत् । १९८९ तमे वर्षे षोडशवर्षीयशिक्षणानुभवस्य आधारेण तस्मै मेधया कालबद्धप्रोन्नत्या विश्वविद्यालयस्य प्राध्यापकपदं प्रदत्तम्। राँचीविश्वविद्यालयस्य स्नातकोत्तरसंस्कृत-विभागे सः फरवरी १९८० तः फरवरी १९९३ पर्यन्तं अध्यापनकार्यं कृतवान् । सः १९७८ तः १९८९ पर्यन्तं प्रायः एकादशवर्षपर्यन्तं महाविद्यालयस्य "आयाम" इति पत्रिकायाः प्रधानसम्पादकरुपेण आसीत्। अस्य पूर्वं १९७४ तः १९७७ पर्यन्तं सः तस्यैव पत्रिकायाः सहसम्पादकरुपेण आसीत्। जनवरी १९९३ तः दिसम्बर १९९६ पर्यन्तं सः मारवाड़ीमहाविद्यालयस्य परीक्षानियन्त्रकरुपेण आसीत्। जनवरी १९९७ तः जनवरी १९९९ पर्यन्तं कार्यतालिकाप्रभारीरुपेण आसीत् । ततः फरवरी १९९९ तः सः मारवाड़ीमहाविद्यालयस्य कोषाध्यक्षपदे कार्यरतः आसीत् ।

एतदतिरिच्य कविः राँचीविश्वविद्यालयतः 'निर्वचनशास्त्रस्य भारतीयपरम्परा तथा आचार्ययास्कः' विषये डॉक्टर ऑफ् लिटरेचर इति उपाधिं लब्धवान्। 'कृष्णोदयम्' इति महाकाव्यस्य रचनायै स १९९८ तमे वर्षे दिल्ली संस्कृत अकादमीतः पण्डितराजजगन्नाथ संस्कृतपद्यरचनापुरस्कारः, अखिलभारतीय मौलिकसंस्कृतसाहित्य-रचना पुरस्कारं च प्राप्तवान्। दिल्ली संस्कृतअकादमीतः २००४ तमे वर्षे कुमारविजयनाटकार्थं डा. आदित्यनाथझा संस्कृतनाट्य-रचनापुरस्कारं प्राप्तवान् ।

**रामाशीषपाण्डेयविरचितानां काव्यकृतीनां संक्षिप्तः परिचयः -**

रामाशीषपाण्डेयविरचितेषु काव्यग्रन्थेषु उल्लेखनीयाः ग्रन्थाः - काव्यकादम्बकम्, कृष्णोदयम्, स्तोत्रमन्दाकिनी, इन्दिराशतकम्, मयूखदूतम्, प्रहेलिकाशतकम्, शिखाबन्धनम्, कर्णार्जुनीयम्, कुमारविजयम्, वैदिकसूक्तसंग्रहः, ऋकसूक्तसंचयः, उपाधिविवेचनम्, विकृतिपाठप्रयोगः, विवेकानन्दः, शतकत्रयम्, स्वतन्त्रभारती, नवनीतामृतम्, भाषातत्त्वालोचनम्, यास्ककालीनपर्यावरणम्, व्युत्पति विज्ञान और आचार्य यास्क इत्यादयः। कविः निरलससारस्वत साधनद्वारा वहुनि काव्यनाटकानि हिन्दीभाषया संस्कृतभाषया च व्यरचयत्। तेन पञ्चत्रिंशदधिकं कविताः रचिताः। एतदतिरिच्य कविः शतं शोधपत्राणि प्रकाशिताः, तस्य रचना आधुनिकसंस्कृतसाहित्यस्य गौरवं व्यापकरुपेण वर्धयामास।

**१. काव्यकादम्बकम् -**

'काव्यकादम्बकम्' इति काव्यं मुक्तककाव्यरूपेण विद्यमानमस्ति। भारतवर्षे अनेके ऋषयः, राजानः च समये अवतीर्य अस्य देशस्य रक्षणं कृतवन्तः। 'सत्यस्य एव जयः भवति' इति मूलमन्त्रं स्वीकृत्य जनाः स्वकर्तव्यपालने सर्वस्वं त्यक्तवन्तः। कविः राष्ट्रभावनया प्रेरितः भारतस्य पुनः पूर्ववत् समृद्धिं कामयते । अस्यां भूमौ कालिदास-वानभट्टादयः बहवः प्रसिद्धाः कवयः अभवन्, ये लोकमङ्गलार्थम् उत्तमानि काव्यानि अरचयत्। तेषां कृतयः अद्यापि प्रशंस्यन्ते। महात्मागान्धी, जवाहरलालनेहरू, पटेलः, शास्त्री प्रमुखाः नेतारः स्वस्य परिश्रमेण देशं स्वातन्त्र्यं प्रापयन्, राष्ट्रभक्तेः उत्कृष्टम् उदाहरणं प्रदर्शितवन्तः। काव्ये शृङ्गारस्य अपि महत्त्वं वर्तते । तेन विना काव्यं नीरसमिव भवति। 'काव्यकादम्बकम्' इति शृङ्गारसम्बद्धाः कतिपयाः कविताः अपि सन्ति। अद्यतनजीवने हास्यस्य अपि विशेषः महत्त्वः वर्तते, यः मनोरञ्जनं करोति, स्वास्थ्यस्य च हितकरः भवति । कविः सर्वेषां मंगलकामनां करोति-सर्वे सुखिनः सन्तु, सर्वेषां मनोरथाः पूर्णाः भवन्तु । सः प्रदूषणसमस्यायाः विषये अपि जनान् जागरूकान् कर्तुं प्रयतते। एतेभ्यः तथ्येभ्यः ज्ञायते यत् 'काव्यकादम्बकम्' इति काव्ये भक्तिः, राष्ट्रभक्तिः, विश्वबन्धुत्वम्, संस्कृतिप्रेमः च इत्यादयः नानाविधाः भावाः सम्यक् रूपेण अभिव्यक्ताः सन्ति ।

**२. कृष्णोदयम् –**

'कृष्णोदयम्' इति महाकाव्यं पञ्चदशसर्गसंयुक्तम्। अस्मिन् महाकाव्ये भगवतः श्रीकृष्णस्य दिव्यचरितं सुश्लिष्टया काव्यशैल्या वर्णितम्। व्यासादयः प्राचीनाः मुनयः भगवतः अवतारान् षड्विधान् निरूपयन्ति - अंशांशावतारः, अंशावतारः, आवेशावतारः, कलावतारः, पूर्णावतारः, परिपूर्णतमावतारश्च। तेषु मरीच्यादयः अंशांशावताराः, ब्रह्मादयः अंशावताराः, कपिल-कूर्मादयः कलावताराः, परशुरामादयः आवेशावताराः, तथा परिपूर्णतमावतारः साक्षात् भगवान् श्रीकृष्णः एव इति निगद्यते। नृसिंहः, रामः, श्वेतदीपाधिपतिः हरिः, वैकुण्ठः, यज्ञः, नरनारायणौ च भगवतः परिपूर्णावतारत्वेन प्रसिद्धाः सन्ति। श्रीरामावतारे सतत्त्वस्य प्रमुखता दृश्यते, परन्तु श्रीकृष्णावतारे आनन्दतत्त्वस्य विशेषोऽभिव्यक्तः विद्यते। यद्यपि सर्वेषाम् अवताराणां स्वस्वा विशिष्टता अस्ति, तथापि केषुचित् अवतारेषु कश्चन धर्मविशेषः प्रमुखतया प्रकाशते। श्रीकृष्णेः आनन्दस्य पराकाष्ठा दृश्यते, अतः सः जनानां प्रीतेः आसक्तेः च प्रमुखविषयः भवति। आनन्दे सर्वे जनाः स्वभावतः अनुरक्ताः भवन्ति- "सुखं मे भूयात् दुःखं मे मा भूत्" इति सार्वभौमा प्रार्थना । अतः सुखस्य, आनन्दस्य च प्रति सर्वेषां स्वाभाविकम् आकर्षणं विद्यते। श्रीकृष्णचरिते तस्य विशेषाभिव्यक्तिः दृश्यते, येन सः जनानां हृदयानि स्वकीयं प्रति आकृष्टवान्। यतः यत्र सुखं, तत्रैव मनसः प्रवृत्तिः भवति ,एषा एव आसक्तेः परिणतिः।

**३. कर्णार्जुनीयम् –**

'कर्णार्जुनीयम्' इति नाटकं षडङ्कसमन्वितमस्ति। अस्य नाटकस्य मुख्योद्देश्यः अधर्मस्य उपरि धर्मस्य, असत्यस्य उपरि सत्यस्य च

विजयप्रतिपादनम् एव अस्ति। अस्मिन् नाटके चरित्रविधानस्य विशेषं महत्त्वं परिलक्ष्यते। अस्य नाटकस्य नायकः अर्जुनः धीरोदात्तनायकलक्षणसमन्वितः, सः वीरः, पाण्डुवंशसमुद्भवः राजकुमारः, दृढप्रतिज्ञः च विद्यते। स्वस्य अचलसंकल्पबलात् सः स्वलक्ष्ये सिद्धिं प्राप्नोति। प्रतिनायकः कर्णः, यतः अर्जुनेन सह तस्य शत्रुता प्रख्याता वर्तते। प्रतिनायकः नायकस्य प्रतिद्वन्द्वी भवति। यद्यपि कर्णः अपि महायोद्धा दानवीरश्च , तथापि अधर्ममार्गानुसरणेन सः स्वमार्गात् विचलितः सञ्जातः। एष एव तस्य पराजयस्य मूलकारणम्। अस्य नाटकस्य नायिका द्रौपदी सर्वगुणसम्पन्ना, कर्तव्यपरायणारूपेण च वर्तते। सा अर्जुनस्य उत्कर्षे नित्यं सहायिका भवति। नाटके नायकनायिकयोः अपेक्षया अन्येषां पुरुषस्त्रीपात्राणामपि महत्त्वपूर्णं योगदानं दृश्यते। नाटके ओजोगुणस्य प्रसादगुणस्य च विशेषः प्राधान्यं वर्तते। अर्जुनस्य संवादाः ओजस्विनः सन्ति, तथा प्रसादगुणसमन्वितत्वात् ते सामान्यपाठकानामपि सहजतया ग्राह्याः भवन्ति, येन तेषां चित्तं ज्ञानरसेन आप्लावितं भवति। अस्मिन् नाटके केवलं संस्कृतभाषायाः प्रयोगः कृतः। युगपरिवर्तनानुसारं प्राकृतभाषायाः व्यवहारः अधुना न्यूनः जातः, तथा तस्याः साहित्यं अपि अल्पं पठ्यते। अतः नाटके प्राकृतभाषायाः प्रयोगेण दुरूहता न स्यात् इति विचार्य नाटककारेण तस्याः प्रयोगः परिहृतः। नाटककारः अस्य नाटकस्य प्रस्तावनायां स्पष्टतया निरूपितवान् यत् प्राकृतभाषायाः अल्पप्रचलनत्वात् तथा सामान्यजनानां कृते दुरधिगमत्वात् अद्यतनकाले तस्याः प्रयोगः अनौचित्यपूर्णः इति ।

एतेषाम् अतिरिच्य अन्येऽपि केचन ग्रन्थाः सन्ति- कुमारविजयम्, वैदिकसूक्तसंग्रहः, ऋकसूक्तसंचयः, उपाधिविवेचनम्, विकृतिपाठ-प्रयोगः, विवेकानन्दः, शतकत्रयम् इत्यादयः।

**रामाशीषपाण्डेयस्य रचनावैशिष्ट्यानि -**

१. **शास्त्रीयपरम्परायाः संरक्षणम्** - रामाशीषपाण्डेयस्य रचनासु वैदिक-पौराणिक-साहित्यिकपरम्पराणां ज्ञानं प्रतिबिम्बितं भवति।

**२. नवीनतायुक्ता शास्त्रीयता** - तस्य काव्येषु नूतनविषयाणां प्रतिपादनं शास्त्रीयशैल्या सह समन्वयं दृश्यते।

३. **भाषायाः सौष्ठवम्** - संस्कृतभाषायाः शुद्धता, सरलता, माधुर्यं च तदीयरचनासु परिलक्ष्यते।

**४. ऐतिहासिक-सांस्कृतिकचेतना -** भारतीयसंस्कृतेः, इतिहासस्य च प्रतिच्छाया तस्य साहित्ये स्पष्टा दृश्यते।

**५. काव्यात्मकता -** शास्त्रगम्भीर्येऽपि तस्य रचनासु काव्यसौन्दर्यम्, अलङ्काराणां च प्रयोगः सहजतया दृश्यते।

**६. भाववैविध्यम्** - तेन महाकाव्यानि, खण्डकाव्यानि, गद्यसाहित्यं, नाटकानि, शोधप्रबन्धाः, कविताः च विविधविधेषु रचिताः। तस्य रचनासु भक्तिः, राष्ट्रभावना, श्रृङ्गारः, हास्यं च नानारूपेण प्रकटितानि सन्ति।

**७. राष्ट्रभावनाप्राधान्यम् –** देशप्रेमः, समाजसुधारभावना च तस्य काव्येषु नाटकेषु च प्रमुखतया दृश्यते।

**८. नाट्यकौशलम् –** 'कर्णार्जुनीयम्' इत्यादिषु नाटकेषु चरित्रविधानं, संवादरचना च अत्युत्कृष्टा अस्ति ।

**९. लोकमङ्गलभावना –** तस्य रचनानां उद्देश्यः केवलं मनोरञ्जनं न, अपितु लोकहितं अपि अस्ति।

**१०. समकालीनविषयप्रस्तुति –** आधुनिकसमाजस्य समस्याः, यथा भ्रष्टाचारः, प्रदूषणम् इत्यादयः अपि तेन स्वकाव्येषु प्रतिबिम्बिताः।

**आधुनिकसंस्कृतसाहित्यस्य विकासे रामाशीषपाण्डेयस्य योगदानानि-**

**१. परम्परायाः आधुनिकतायाः च समन्वयः –** रामाशीषपाण्डेयः संस्कृतकाव्ये गद्ये, नाटके, खण्डकाव्ये च प्राचीनशास्त्रीयशैलीम् आधुनिकविषयवस्तुना सह सम्यक् संयोजितवान्। तस्य 'कर्णार्जुनीयम्', 'काव्यकादम्बकम्' इत्यादिषु रचनासु पुराणेतिहासेन सह आधुनिकदर्शनं मानवीयमूल्यानि च सुस्पष्टतया अभिव्यक्तानि सन्ति ।

**२. अनुसन्धानं समीक्षात्मका च रचनाः** - संस्कृतसाहित्यस्य इतिहासे, व्याकरणे, अलङ्कारशास्त्रे च तस्य गम्भीराः अनुसन्धानाः आधुनिकविद्यार्थिनां शोधार्थिनां च कृते अपरिहार्याः सन्ति । सः संस्कृत-हिन्दीभाषासु अनेकान् ग्रन्थान् अनूद्य संस्कृतज्ञानस्य वैश्विकप्रसारं कृतम्।

**३. भाषायाः सर्जनात्मकता** - रामाशीषपाण्डेयस्य रचनासु संस्कृत-भाषायाः शुद्धता सरलता च अक्षुण्णा सती अपि नवीनशब्दानां भावनानां च समुचितः प्रयोगः दृश्यते। आधुनिकसामाजिक-दार्शनिक-भक्तिविषयान् संस्कृतसाहित्ये निवेश्य सः भाषायाः प्रासङ्गिकतां संरक्षितम्।

**४. आन्तरराष्ट्रीयसम्मानप्राप्तिः**-रामाशीषपाण्डेयः साहित्य आकादेमी, अखिलभारतीय मौलिकसंस्कृतसाहित्यरचना, पण्डितराजजगन्नाथ संस्कृतपद्यरचनापुरस्कारः इत्यादिभिः अनेकैः राष्ट्रीय-अन्तरराष्ट्रीय-सम्मानैः अलङ्कृतः। सः विश्वस्तरे संस्कृतभाषायाः प्रचारं कृतवान् तथा भारतीय-पाश्चात्यविद्वत्समाजयोः मध्ये सेतुरूपेण कार्यं कृतम्।

**५. शिक्षाक्षेत्रे प्रभावः –** हथुआराज-ज्ञानोदय-संस्कृतमहाविद्यालये साहित्यप्राध्यापकपदे, मारवाडीमहाविद्यालये रॉचीनगरे संस्कृत-व्याख्याता च भूत्वा सः अनेकान् शोधकर्तॄन् अशिक्षयत्। तस्य रचनाः संस्कृतशिक्षायाः पाठ्यक्रमेषु समाविष्टाः सन्ति, येन नूतनपीढीं प्रेरयन्ति। रामाशीषपाण्डेयः केवलं पण्डितः न, अपितु संस्कृतसा-हित्यस्य पुनर्जागरणस्य प्रवर्तकः अस्ति। तस्य कार्यं संस्कृतभाषाम् एका सजीवां विकासशीलां च भाषां रक्षीतवती, या शास्त्रीयमहिमा आधुनिकचेतनया च सह समन्वयं करोति।

**उपसंहारः**

रामाशीषपाण्डेयः आधुनिकसंस्कृतसाहित्यस्य प्रमुखेषु साहित्य-कारेषु अन्यतमः। सः स्वकीयया अभिनवरचनाशैल्या, सरलसुबोधभाषया च संस्कृतसाहित्ये नवचैतन्यं प्रसारयति। तस्य काव्येषु राष्ट्रभावना, भक्तिः, संस्कृतिप्रेम, सामाजिकचेतना च सम्यक् अभिव्यक्ताः दृश्यन्ते। 'काव्यकादम्बकम्', 'इन्दिराशतकम्', 'कृष्णोदयम्', 'कर्णार्जुनीयम्', इत्यादयः तस्य रचनाः, तस्य साहित्यप्रतिभायाः उत्कृष्टं प्रमाणम्। तस्य काव्येषु, नाटकेषु च माधुर्य-ओजगुणस्य प्राधान्यं परिलक्ष्यते। सः न केवलं मनोरञ्जनाय, अपितु लोकमङ्गलाय, नैतिकमूल्यानां संवर्धनाय च साहित्यं रचयति। अतः निःसन्देहं वक्तुं शक्यते यत् आधुनिकसंस्कृतसाहित्यस्य विकासे रामाशीषपाण्डेयस्य योगदानम् अत्यन्तं महत्त्वपूर्णम् तथा अविस्मरणीयमस्ति।

**सन्दर्भग्रन्थाः -**


- त्रिपाठी, राधावल्लभ। आधुनिक संस्कृत साहित्य का समग्र इतिहास। निउ भारतीय बुक कर्पोरेशन। २०२३।
- पाण्डेय, मिथिलेश। आधुनिक संस्कृत साहित्य का इतिहास। राधा पब्लिकेशन्स। २०१९ ।
- शास्त्री, कुतुम्व। त्रिपाठी, राधावल्लभ। पाण्डेय, रमाकान्त। सिंहादेय, धर्मेन्द्र कुमार। आधुनिक संस्कृत साहित्य सन्दर्भसूची। निउ दिल्ली, राष्ट्रीय संस्कृत संस्थान। २००३।
- पाण्डेय, डॉ. रामाशीष। काव्यकादम्वकम्। प्रवोध संस्कृत प्रकाशनम्। राँची, बिहार।१९९३
- पाण्डेय, डॉ. रामाशीष। कृष्णोदयम् । प्रवोध संस्कृत प्रकाशनम्। राँची, बिहार।१९९६।
- पाण्डेय, डॉ. रामाशीष। कर्णार्जुनीयम् । प्रवोध संस्कृत प्रकाशनम्। राँची, बिहार।१९८९।
- पाण्डेय, डॉ. रामाशीष। इन्दिराशतकम् । प्रवोध संस्कृत प्रकाशनम्। राँची, बिहार।१९८६ ।